वित्तीनेतिगृहानुयै। नीतानीम्य जन्यमानः स्मावस च्योनम म्नकत्यगृहमावित्ती नेतिमं
त्रेणगृहेषुनदृश्मततनगृहानृस्वनि वामगृहंदुपेति उपगच्छति। उपतिष्ठनदृश्यर्थः॥ प्रो॥

राम
६८

श्रीग

प्रोष्य गृहानुपतिष्ठते पूर्ववदिति गृह्यकारेणोपस्थानस्योक्तत्वात्। हे माधव इति म॰
शति विं ततः हे माधव इति मन्त्रेण तात्रिवासापर्यन्तं गृहान् प्रविशति। अतः परं प्रोक्त
पुत्रदर्शनं तु नयादिकर्तव्यं न बहुत्र दर्शनेन गृह्यकारादिति जपः। तच्छिरोवघ्राणमन्त्रजा॰
पतेरिति अत्र मंत्रे ऽस्मादित्यस्य स्थाने स्वं बुद्धा तत्पुत्रनामग्रहणं। गवां त्वेति वत्सहृत्पु॰
त्रशिरोवघ्राणं। हुं हुं हिं। पुत्रस्य दक्षिणे कर्णे ऽस्मे प्र यन्धीति जपः॥ ते अस्मै कर्णे ईद
न्त्र स्थानीति। एवमग्निपुत्रामावर्त्तनीयां पुत्र्यास्तु शिरोवघ्राणमात्रं इति हे माधव
व इति प्रविशति ततः हे माधवः शान्त्या इति मन्त्रेण तात्रिवासापर्यन्तं गृहां प्रविशति ग॰
हान्तस्थेत्स्यापतत्त्वः तर्हिं ँ स्या दृश्यात्कामगृहं ज्वरः। तस्मिन्नहृहागमनदिवसे गृह्या
इग्रहेन्नवान्नार्यापुत्रस्त्न्यादी हृत्व्यपराधे सत्यपि न हिंस्यात्। अभिरूपताव
र्णतादिनानो त्वाटयेत्। अथ्यात्तोगृहाणामेवोपचार इति प्रकृत्यास्याध्यस्य त्व
णाश कामं दृष्ट्या घात्याहिंनीयेहन्यपराधनिमित्तवाग्दण्डादिभिर्हिस्यादुत्त्वाटनं कुर्यात्
।स यदि हापि सुवृक्षस्या छूपताननतत्कुर्यात् गृहृदिष्यतां वाकरिष्य वास्यादिति
श्रुतेः। तस्य ज्वरः कुत्रचित् विश्रीहारिन्यस्यासमर्थ्यः। अस्तु गृहाणामन्यासः। कांवो
पद्यन्त आहा तस्य ज्वर इति तस्य यजमानस्य कुलं वंशं वि हुंसो विकुर्वि
न एकं कर्तुमी ज्वरः। व्यत्ययेनैकवचनं दृष्टव्यमिति गृह्याः समर्थ्यालंवनीति १२ उद्धृरेनिय

श्री० ६६

69

नमाने वृषान्सायंप्रातरग्निहोत्रे। अथाग्निहोत्रमुख्यने। अग्निहोत्रे अग्निहोत्रसं
नके कर्मणि सायंकाले प्रातःकाले च यथामुहूर्ते नीमं प्रैषमध्वर्युः प्रतिब्रूयात्। एतच्चान्य
कर्तृकहोमपक्षे। स्वयंहोमपक्षे तु प्रैषाभावः। अग्निहोत्रशब्दो वक्ष्यमाणस्य कर्मणो
नामधेयं अग्निहोत्रं जुहुयादित्यादौ संव्यवहारार्थं। अग्निहोत्रं इन्फक्तं स्तोदि ष्याग्यर्थोद्धरणे
नायं प्रैषः। सत्यप्येककर्मत्वे कात्यायनादिभ्यां गार्हपत्यान्नित्ये वनीति सायंप्रातर्नित्यं
गार्हपत्यादाहवनीयस्योद्धरणमनस्तमितानुदितयोः। अनस्तमिते। अनुदिते च सूर्ये गार्ह
पत्यादग्निहोत्रहोमार्थं ज्वलत आहवनीयस्योद्धरणं कृत्वा प्रांचं नीत्वाहवनीयस्थाने स्थाप
नं कर्तव्यं। ततः पूर्वस्मान्नीन्यादिसहमादीन्य व संस्कारेणाहवनीयस्थाने कृत्वा। स यः पुर
दिन्यस्याग्नमपादाहवनीयमुद्धरतिरति स्कन्नेः। अनुद्धृतास्तमये अनुद्धृतास्कन्दयेव
प्राचां द्विजानां विधानाज्ञानस्तमितानुदितयोरिह स्कन्नं। गार्हपत्यादाहवनीयज्वलंत
मुद्धरणीयमित्यापस्तंबः। गार्हपत्यं वा वसंगच्छतिगार्हपत्याद्धूत आहवनीयमवनीतिनस्मा
देनं गार्हपत्याप्राचमुद्धरनीति स्कन्नेगार्हपत्यादिस्कन्नं। उदितहोमपक्षे त्वक्ष्णद्धरणानु
दितएव कर्तव्यं। अन्यार्थमुहूर्ते अग्निहोत्रहोमकाले आगते। तमग्रणीतमेवाग्निहो
त्रं वाग्निहोत्रहोमः। स्रुवेण प्रधारणादावुत्तरेवेद्यां वाहवनीये प्रणीते होमकाले आगते
नि प्रणीतएवाग्निहोत्रं होतव्यमित्याचारोहायपस्तंबः प्रणीते वेदग्निहोत्रकाल एनास्मी:

राम
६६

त्रेवाग्निहोत्रं जुहुयाद् देवमन्यत्रेति यत्पुनः करणे होत्रं । संप्रदायपद्धुतस्यान्यथोक्तं च अग्निप्र
णीते नाग्निहोमः । अनग्नत्वाद् अग्निहोत्रहोमस्येति । ननु पुत्रिकामात्रं । इदं तु वचनं । नाग्निवच
नस्य किंचित्करं । तस्मादग्निप्रणीत एव होतव्यः । प्रत्यग्रुषे वा वासायं निदध्यात् तस्मिंस्सायंप्रा
तर्होममेके । अथ वासायंहोमकाले प्रत्यग्रुषोऽग्निं स्थापयेत् शवासामात्युष एवातत्यात् तस्मिन्न
सत्युष स्थापिते आहवनीये एके आचार्याः सायंप्रातर्होममिच्छंति । तदा च प्रातर्होमार्थं त
स्य धारणे कार्यं । अन्ये प्रातर्होमार्थं पुनरुद्धरंति नित्यो दक्षिणाग्निः । दक्षिणा वा मंहरेद् वा
हार्यपचनमथेदिन्यस्मिन्नग्नौ दक्षिणाग्निर्नित्यो भवति । सर्वदा स एव तत्र वा नित्य प्रातिक्रमे
आह्रियते । नित्यपदानुवृत्तिर्नो ते ना ह । सर्वे गतश्रियः । गता प्राप्ता श्रीर्येनासौ गतश्रीः प्रा
सश्रीः । गता श्रीर्येनेति वाहुतीयार्थे बहुव्रीहिसमासः । तस्य गतश्रियः प्राप्तसमृद्धेर्यजमा
नस्य सर्वेऽग्नयो नित्या भवंति आहवनीयदक्षिणाग्नी अपि गार्हपत्यावत्सदा धार्यावित्यर्थ
: धार्या गतश्रिय इति वचनात् । त्रयो ह वै गतश्रियः शुश्रुवान् ब्राह्मणः क्षत्रियो विजयी राजा
वैश्यो ग्रामणीरिति । नित्यइध्मानानामपि प्रादुःकरणमनस्तमित एव कर्तव्यं । न तु तत्काले । सूर्ये संशैल
मप्राप्ते षडङ्गुलिः संध्यांगुलेः प्रादुःकरणमग्नीनां प्रातस्तीसांच दर्शनादिति । पुरच्छायानां
संगोत्रं तु हृद्यं प्रादुःकरणं नित्य सूतं इति शांखायनः । सदा वाहरणं । दक्षिणाग्नेः सदा वाहू
रणं आहवनीयवदेव कर्तव्यं । दक्षिणाग्निमकृत्स्नं यदेन महरहर्दक्षिणान आहरंतीति

क्तेः एकेषामुपवसथे। एकेषामाचार्याणांमते उपवसथे यो ऽर्धमासस्यामावास्यायां
श्री० च दक्षिणाग्नेराहरणं न सर्वदा उपवसथ एवैनमाहरेयुरिति वचनात् अस्मिन्पक्षे ऽर्वा
गुपवसथात् न राजन्ते तस्य धारणं कार्यं। नवावसिते नवा। नवावसिते नवा गार्हपत्याग्नेर्दक्षि॰
७० णाग्निमाहरेयुः। नवावसिते वै नमाहरेयुरिति श्रुतेः। न सर्वदा। नाप्युपवसथ इति।।
अस्मिन्नपि पक्षे तस्य धारणं कार्यं न दूरं हवासं यावत्। तस्मिन्नेवेयुरमाहः स्तः। तस्मिन्न॰
वावसिता हृते दक्षिणाग्नौ अमांसमाषमक्षारलवणमन्नं पाकयोग्यं पचेयुः। त
स्मिन्नेव येयुस्तद्ब्राह्मणा अश्नीयुरितसुकृत्वा स्याकानंतरं तस्य कुमन्नं ब्राह्मणाः प्रा॰
श्नीयुः। पाकानां वेगोः पयोधि अपि नाव ब्रूयात्। पाकस्य पचनार्हस्य तदुलपिष्ट
दिरनाव अस्य पत्नी यजमानो ध्वर्युं प्रतिगाः पयोधिश्रयि न वा इति इमं प्रैषं ब्रूयात्।
ततोध्वर्युस्तस्य पोदाक्षिणाग्नावधिश्रयेत्। पृषृष्यन्नविंद्यस्य वेदपि गोरेव दुग्धमधि
श्रयिन वै ब्रूयात् इति श्रुतेः। नब्राह्मणं पयोधि न वै ब्रूयात्। ततो ध्वर्युर्यजमानप्रत्याहरण॰
ब्राह्मणं यायपि न वा इति। तस्मिन्ब्राह्मणान्यायपि न वै ब्रूयादिति श्रुतेः। ततो यजमान
एवम घ्वर्युणा प्रेषितस्तस्य पो ब्राह्मणान्याययेत्। अधुनामाहृतमुच्यते। अनंतरेण
पूर्णमग्नी गत्वा दक्षिणेन वा प्रदक्षिणमाहवनीयं परीत्य सो पविशति यजमानः। यजमानः
संधावंदनानंतरं अपरेणाग्नी गार्हपत्यस्य दक्षिणाग्नी अनंतरेण गत्वा गार्हपत्यस्य दक्षिण

टा

एम
७०

प

न्वाम ध्येनोत्तरेणैनं गत्वा अपि वाग्नी दक्षिणेन गत्वा अपरदक्षिणमप्रदक्षिणमाहवनीयं
परीत्यस्वस्थाने उपविशति। एवं ब्रह्मणाहवनीयं परीत्यान्तरेण गार्हपत्यस्य चेतीति फक्तेः॥ अप्र
दक्षिणमाहवनीयं परीत्य गार्हपत्याहवनीययोरन्तरेणैव दक्षिणतः स्वासनं प्रतिगच्छ
तीत्यर्थः॥ अथ यत्स्वक्तस्तः संचरः च स्यमार्गोक्तशास्त्रांतरीयः॥ दक्षिणेन प्रवेशनमग्नि
होत्रेऽपि चिन्तितव्यं मात्रेवं गार्हपत्यागारस्य दक्षिणेन द्वारेण प्रविश्येन तत्केचित्थ्यासं ध्यावंद
नानंतरं एवमग्निहोत्रहोमानंतरः स्मार्तानौ न दुष्टं। होमं विनानिकेतत्वात्स्मार्ते कुर्यादित्युक्त
रुणः॥ स्मर्तीनां वेदमूलत्वात्स्मार्ते केचित्करणं विदुरिति। यजीवस्य वेदनात्। यस्यापि एवं वदु
पविशति। एवं वदिति प्रसङ्गदक्षिणतो गार्हपत्यस्येति। चशब्दाद्यजमानोऽपि एवं वदिति।
तेन दक्षिणतो ब्रह्मयजमानयोरासनं द्रष्टिनिर्देशः पूर्णमासविषयं परिभाषितं भवति नातिदि भ
श्यते। अपरे त्वन्यथा व्याचक्षते। यजमानस्य पारिभाषिकमुपवेशनं सिद्धमेवापरिभा
षायाः सर्वसाधारणत्वादिति निवेशहस्तेत्र व्यापारः॥ तेन यमपि च शब्दादन्तरेणाप
रग्नी गत्वा अपराग्नी दक्षिणेन वा गत्वा अप्रदक्षिणमाहवनीयपरीत्योपविशतीति
न दासस्यमनेहति। युक्तरूपमित्थावितत्। अपरेणाहवनीयं कूर्चनिहितान्कुशान्वा आ धा
हवनीयमपरेण आहवनीयस्य पश्चात्सागग्नेरुदगग्नेर्वा कूर्चं निदधाति स्थापयति।
अथ वा कुशानेव यद्विदधाति न कूर्चो कूर्चशब्देनासनपरमुच्यते। कूर्चादयावत्स्यन्नु

वा चेति नव्यादिरणपेवा कूर्चहस्त्यादौ उपवेशनार्थं आसने प्रयोगदर्शनात्। अत्र च स्फ
व एनदासनं। कूर्चैर्निधायेनिवस्समाणत्वात्। नेन बाहुप्रमाणो वारणः आसनपदस्य हि
शः कूर्चो भवति। कुशनिधानपक्षे कूर्चैर्निधानादिकं कूर्चकार्यं कुशैरेव करणीयं। नन्
स्थाने विकल्पविधानात् परिस्तरणं वा सर्वेषां प्रागुदगग्रैरुदगग्रैर्दक्षिणाग्नान्क
रेतीति भक्तेः। मन्नाग्निहोत्रे। अग्न्यपान्यमूल्कदीर्वीनाम्नानि स्तरणानि भवन्ति दक्षिणा
ग्नानि नानित्तत्करोतीति भवणात्। अग्न्यपान्यमूलसुट्टीवीनाम्नानि स्तरणानि तु सुदृ
पत्नानुवादस्तत्दैवोपपद्यते न ताग्निहोत्रे प्रागुदगग्नेः स्तरणं भवतीति। मन्नाग्निहोत्रे आ
हवनीयस्यैव परिस्तरणदर्शनमादित्सायितस्यैव भवतीत्याशंक्य वा सर्वेषामग्नीनामित्युक्तं ने। सर्वे
षामेव। यत्न परिस्तरणं होमस्य सर्वैर्विहितत्वात्परिस्तरणं होमार्थत्वाद्वा आहवनीयं पर्यु
क्षोच धमरं निनयेत्स्या गार्हपत्यात्। प्रथममाहवनीयं परिस्तीर्य ततो गार्हपत्यं ततो दक्षि।
णाग्निं च परिस्तरणानि तत्र तेनैव क्रमेण प्रथममाहवनीयं पर्युक्ष्य हस्तग्रहीनेनोदकेन पु
रिस्तमन्त्रा। शाक्यान तु आहवनीयोद्धारम्भोद्धारादुदकं स्पृष्टः आगार्हपत्यान् गार्ह
पत्यस्य पर्युक्षणानन्तरं दक्षिणाग्निं पर्युक्षति। प्राक्तस्थापावनप्रसवं स्थापनिनयति। तु
वनुनस्त्वं गाए हपत्यं च शकृत्यापर्युक्षति। ततो दक्षिणाग्निं। ततो गार्हपत्यस्य पर्युक्षणानन्तरं द
क्षिणाग्नेः पर्युक्षणं यथा स्यादिति। ततो दक्षिणाग्निमित्युक्तं। हुतेन च धारावर्जी हुतेनेवा

ग्निहोत्रे यजमानस्योपस्थानासनानंतरं प्राग्वा विसर्गो देवमेवाग्नीन्पर्युक्ष्य निधा
णवर्जे भिनिध्वंसनं वर्जयित्वा। वायुप्रमस्य कर्तृधर्मत्वेन पदार्थांगत्वात्। पर्युक्षणमा
दा पिहिपर्यं चेत्यर्थः इति॥ १३ अग्निहोत्री दोहयति पुंवत्सामन्दूर्ध्वगस्थाल्यामापेचिन्त्यामू
र्ध्वकपालायां दक्षिणतः प्राचीमुदीचीं वा अग्निहोत्रशब्देन कर्मवाचिना तत्साध ध
नं पयो लक्ष्यते न त्वग्निहोत्रमस्यामस्तीति मत्वर्थीयोऽग्निहोत्रिशब्दो न त्वग्निहोत्रमस्य यत्नोपेच
ने अग्निहोत्री निष्पत्तिलक्षणावपि गौः अग्निहोत्रशब्दप्रयोगोऽदोहशयने। यस्या
ग्निहोत्री दोह्यमाना वास्येन दोह्यमानो यविशेदित्यादौ। अतोऽग्निहोत्रीशब्देन गौ
रुच्यते। अध्वर्युरुद्धृत्य दोहनशब्दादन्येन दोग्ध्रा स्थाल्यामग्निहोत्रीं गां दोहयति दोहयतीति
हेतुमत्यस्मिन्निजंतत्वाद्ग्निहोत्रग्निहोत्री धृक्त्वे निनदोग्ध्वार दोहनेप्रेरयति। नः सदोग्ध्याप्रविनः सं न
स्थाल्यां गां यथा दोग्धि। कीदृशीमग्निहोत्रीं गां। पुंवत्सां। पुमान्वत्सो यस्याः सा पुंवत्सा तामि
ति तस्मादस्य पुंवत्साग्निहोत्री स्यादिति वचनात्। कस्थितां दोहयतीति दक्षिणतो विहारादक्षि
णस्यां दिशि प्राचीं प्राङ्मुखीं स्थितां। उदीचीं वा। उदङ्मुखीं वा स्थितां गां दोहयति। कीदृ
श्यां स्थाल्यां। आयश्चित्यां। आयसस्य त्रैवर्णिकस्य रुजितः। आयश्चितिः तस्यां त्रैवर्णिके
न घटितायां निष्पादितायां स्थाल्यां। पुनः कीदृश्यां स्थाल्यां मुर्ध्वकपालायां। तत्रिर्यक्क
पालायां। यद्दिवाग्निहोत्रेनि लिंगान्नक्तिकाय्या। अत्र गोहिद्धि यमविधसनाशंनात्सेगवा ध्य
गो

ग्री० दक्षिणं यमोनन्तवनि । पूर्वेणाहवनीयमाहृत्य गार्हपत्ये संधिक्षय यस्य उत्तरतो निहत्यागारान्
। नदेगन्ध मदु गन्धं स्थालीस्थं यथो हस्तेन गृहीत्वा आहवनीय पूर्वेणाहस्ताहरणान्पूर्वमे
मेव गार्हपत्यस्यागारानुत्तरत उदुत्याक्षयणार्थं पञ्च कृत्वा न कुः यथ आहृ संनेषु पञ्च
१२ कृत्ने षङ्गारे षधि क्षयनि । गार्हपत्य संगृह्याण वाहवनीयक्षः रासयो । क्षयणं वाहवनीयमि
नि विकल्पेनतन्त्रापि माप्तेः । ननु सूत्र क्रमेणो वाहरणानेन्तरमंगारेद्वहनं कथमवनि । उच्य
ते । क्रनावाहरणस्य पूर्वमुद्दनस्य दर्शनात् । न याहि । यस्याग्निहोत्रं दोहिनममेध्यमापद्ये
नेति प्रक्रम्य पूर्वैनेगारानिरूढाय छधिक्षयि क्षयनीति । अस्यां हि क्रनो दोहिना
वस्थायां अंगारनिरूहणं सिद्धं हृश्यते । अतः पूर्वं निरूहणं । नत आहरणमिति । एव
मन्यत्रापि होमार्थस्याहरणे तेन्य त्रापि पर्ववानीयहोमार्थो होमार्थस्यादिहूत्मस्यैव ज्या
मेव पूर्वेणाहवनीयमाहरणं कर्त्तव्यं । दक्षिणेनवौषधं । उ० बधं व्रीहियवादिकं । नदा आ
हवनीयं दक्षिणेनवानीयते । वा आहवनीयं पूर्वेण । वा आहवनीयमुत्तरेणानिकेवित्
न त्र दक्षिणानानयने प्रदक्षिणानयना संस्म सनुग्नहः । उत्तरेणानयने तूत्तरन उपवा
। रीव यजरनि क्र सनुग्नहः । नत्र भूत्ने वंलीयस्त्वादुत्तरेणो वैस्सव धमर्यो नेतरेण । नावज्ञो
सानि आपः पुनरवज्योत्तसनि धाय त्रिरुत्पूयस्य स्फरेक । न दर्धि श्रिनय पर्यग्निकेनत्रणेनाव
ज्यानयनज्योत्स्नापुक्के नदर्भाग्रेणवा स्रुवं प्रकाशयोदित्यर्थः । नत्र्युत्तरेणं परिस्तनतरेणम्यो ।

राम
१२

न्यदेवगनास्थां॥ अन्ये वा युक्तत्वादिति न्यायात्। ननुः स्रुवेणापो गृहीत्वा पयोमध्ये आ॥
सिंचेत्। अप्यायः प्रस्नानयति। शंस्येन्वेवेति स्रुक्ते॥ उदकं स्मापयसः शांसे शमनायेत्यर्थः॥
॥ स्रुवेणोनि कुनः॥ स्रुवेणापः प्रस्नानयतीति शाखान्तरात्। ननुः पुनरवज्योतनं निषिद्धं। निषि
द्धमुत्स्कामुत्स्कात्रिहृदग्युहूस्यसुद्री आदिश्य पुहूस्स यति। प्रथममवज्योतनं दृष्टार्थं। न दृवज्यो ८
तयति भ्न नं वेदानीति स्रुक्ते॥ अतो वाधिश्रयणं अप्रयणार्थमेव तत्र दुग्धाधिश्रयति भ्नन
मस्तादिति स्रुक्ते। ननु भ्न न कथं ज्ञायते इत्यत आह। हानदारुयं त्युदंतन्न हिम्भ्र नं नहिं जुहुया
दिति। यहिं यस्मिन्काले तस्य यदुदंनं पाकवशाद् दुद्भ नं बुद्बुदवद्भवति नहिं तस्मिन्काले नवछ
भ तं भवति तदवस्थापन्नेन पयसा जुहुयादित्यर्थः॥ इमं परं निषेधति। न हैनोरूपं न कुर्या
दिति। कथं नहिं जुहुयादिति। अधिश्रित्यैव जुहुयात्। अधिश्रयणानन्तरमेव जुहुयान्न
नुतापेनोदनं कुर्यादिति। अधिश्रयणमात्रेणैव न छन्न तादृशेनैव होमः कार्य इत्यर्थः॥ अ
नभ्रविकल्पः॥ उदंनं कुर्यान्नवेति। अवज्योतनस्य च भ्रनसावदनार्थत्वात न तुलदृष्टादाव
भावः॥ उदकासेचनमपि दृष्टार्थं तापनोदकस्यैव स्ययोपव्यायस्यात्पयस इति। आप्यायः प्र
स्नानयति शंसैन्वेवेरसस्यो चैव सर्वत्रायेति स्रुक्ते॥ ननु स्रुं तुलादावास्येव नाभावः॥ पुनरव
ज्योतनमप्यासिक्तस्योदकस्य च्युपजाना नार्थी न तस्यापि न तुलादाव भावः॥ मवागवंभथ्य
माव ज्योतनं भवति। नापामासेकः॥ न च पुनरवज्योतनं नं दृष्टं तेषु दकासेको न भवति॥ विरे॥

श्री०

७२

73

धनं। अवस्थानेनानुमवति। निधायमिति एतमूलयं ननक्त्रनिधायपनिधायेत्यर्थः॥ अतएव
मनाग्निहोत्रे प्रतिषेधेन नत्रि॥ प्रतिष्ठाप्याउद्धरतीति। प्रतिष्ठाप्य प्रतिष्ठाप्य उद्धरतीत्यर्थः॥
नत्रानिषेधाद् द्विविधिरुन्नीयते। उद्धृतस्य नानन्तरं दृष्टवत्कृतानामधिक्रियस्मात् श्रोतानामंगारं
णां गार्हपत्यसमध्येप्रेरणं। शारवानराणं। अस्तमिते जुहोति। अस्तमिते सूर्ये सायमग्निहो
त्रं जुहोति। सायं प्रातरस्तमितं जुहोतीति फलितः॥ आश्वलायनः॥ प्रदोषान्ते होमकालः
संगवान्तः प्रातस्तनस्य। स्वाहेति नीत्वा जुहोति माज्यं जुहुयात्। यदि सायं दोषावस्तर्नमः स्वा
हेति। यदि प्रातः प्रातर्दोषावस्तर्नमः स्वाहेति। अत्रास्त। मिते द्यस्य कृत्वा मावीनमनस्त।
मित इति न शंकनीयं अंगानां प्रधानकालत्वस्य न्याय्यत्वादुद्धरणे उद्धरणाद्धमस्तमित
एव कर्तव्यं उद्धरणमात्रस्यैवानस्तमिते ऋवणात्। सायः पुरा दिसस्यास्तमयादाहवनीय
मुद्धरतीति। अस्तमिते लक्षणमाह कात्यायनः॥ यावत्संप्रदृश्यन्ते न भूम्यां रश्मयस्तावत् सर्वं तः
नच लोहितिमायेतिनावत्सायं उद्धृतयत इति वैकंकतः स्रुवः स्रुवकल्पं प्रमार्जनं संमार्ष्टि वैकंक पाणि
न वृक्षनिर्मितं स्रुक् स्रुवं प्रतप्य पाणिना हस्तेन संमार्ष्टि शोधयति। हस्तस्य प्रथनेन स्रुग्नर
जोपनीय निर्मलीकरोतीत्यर्थः॥ एवं स्रुवस्य संमार्जनं पुनः प्रतप्य तदा नलकवः। होमस
व्यधा हि वैकंकती स्रुक् स्रुव मासो न्येवा। स्रुवार्थवचनं। अत्रापस्तंबसूत्रे विशेषः॥ वैकंक
तमग्निहोत्रहवणी बाहुमात्र अरत्निमात्री वा प्रसूनारु निरिति। पुनः प्रतप्यान्ने स्थमी।

रत्नि

राम

७२

× धाय्यामित्यनेन कौश्यादेर्निषेधः ×

साह्वापुनः स्रुकः कृत्स्नं प्रतप्य उत्तेष्यामीति यजमानं पृच्छेत्। उं सुत्तपेति यजमानस्तिष्ठन्
। यजमानस्तिष्ठन् ऊं सुत्तपेति ततः स्रुवं स काशान्तुरः स्रुवान् स्रुक्स्रुन्नयति। इदं स्रुवं गृहीत्वा मा
निहूयार्थं। अनन्तरं सर्वाहुतसनन्तरं दुग्धनाशार्थं उत्तरं पुनः स्रुवं पुनरग्नौ तुर्गृहीतस्य ताम स्रुवा
र्थस्य नाशार्थं भस्मादेतौ यदेव ननन्दर्थे पुनर्ग्रहणं। यथा वर्त्तीनाय चस्रुवानुन्नयति। यच
मंत्रमदग्नीनामितस्याशयस्तं स्रुव वचनात्। स्रुक्स्थाल्यां परिशिष्टं न भक्षणः पिबेत्। स्रुक्स्था
ल्यां यस्य यः परिशिष्टं नस यो ब्राह्मण एव पिबेत्। नायं ब्राह्मणस्य पानेनियमः।
किं नर्त्व ब्राह्मणस्य प्रतिषेधमेयं। अब्राह्मणस्तं न पिबेदिति नहि नाब्राह्मणः पिबेदि
ति वचनात्। उपरिसमिधं धारयन्त्वा स्रुम ध्यधिगार्हपत्यादाहवनीयं हरति सुखमा
त्रे धारयन्। स्रुग्दंडस्योपरि ततु गृहीतस्य पयस उपरि वा स्रुं पालाशादिद्ध स्रो द्रुवां प्रा
देशमात्रीं समिधं अंगुल्याघनगिरिताया धारयन्। ततो अध्यधिगार्हपत्यात् अध्यधि
शृतः सामीप्ये उपरिभावे वानेन स्रुचं हस्ते न गृहीत्वा प्रथमगार्हपत्यस्योपरि समीप एव धारय
तिततो मुखमात्रे स्रुचं धारयन्त्वाहवनीयं प्रति होमार्थं हरति। अथ समिधमादद्ववतीति
वचनात् तो परिष्टात्समिधमन्यस्य हरति यद्यपरिष्टात्समिधमन्यस्य हरेदेव न कुर्यादिति
मताग्निहोत्रे दर्शनात् उपरिष्टात् स्रुग्दंडेन समिधमुपसंयम्य मनुःसमिद्धोमस्य ता बु
क्ताः। पालाश्य समिधः कायरिवादिर्यस्तदत्ता मनः शमीरोहीतकाम्बष्ठीस्तदमाधेर्कं॥
उपरिष्टात्स्रुग्धृदेवेभ्योहि देवेभ्यो धारयतीति स्रुग्दंडे समिधमुपसंगृह्येति धारणान स्रुवसमिध उप
रिधारणं। उ २

वैनसौ॥ तथा॥ पालाशखदिरमध्यमशम्युदुंबरजा अपि। अपामार्गोऽर्कदूर्वा च कुशश्चैव सप
श्री॰ रेविदुरिति। मध्येनिगत्य स्थाद्दूत्योपाविश्यसामिश्यसामिधमादधात्यग्निर्ज्योतिषं त्वेन। गार्हपत्या
हवनीययोर्मध्ये अंतरालेल्कं चमुखमात्र छूनां नाभिप्रदेशं यावन्निगत्यनीचैर्गतो हुत्वा पु
 नर्हुं दूत्यमुखमात्रएव पुनर्ध्दं त्वा आहवनीयसमीपं सोप्योपविश्याग्निर्ज्योतिषं त्वेस
नेनमन्त्रेणाहवनीयेमध्येसमिधमादधाति। समिदाधानं च कूर्वेल्कवमनुसाधे वस ब्रह
74 स्तेल्कवं घंत्वा कार्यं। सोनुपसाद्य पूर्वामाहुतिं जुहोतीति वचनात्। ह स्तार्धमेतत्समिदाधानं
इंधनार्थत्वात्। अनो ब्राह्मणहस्तादिष्वर्धत्वोपादस्यामेव॥ प्रदीप्तानमिं जुहोत्याग्निर्ज्यो भि
तिरितिसज्जूरितिवा। प्रदीप्ताप्रकर्षेणोनदीप्तासमिघमपि समिधउपरिशाखांतरासमि
धेमूलाघंगुलं परित्यज्यमध्यमभागे अग्निर्ज्योतिरितिमंत्रेणप्रथमाहुतिः। अस
त्येन द्वयेणा जुहोति। अप्यवासज्जूर्देवेतिमंत्रेणरात्रिपूर्वायुक्तेन जुहोति। इतिमंत्रविक
त्पः॥ सजुहोत्याग्निर्ज्योतिर्ज्योतिःस्वाहेति वचनात् अनेनैवजुहुयात्सज्जूर्देवेनसवित्रेति व
चनात्। कार्देकेमादेशमात्रीसमिधमाधयप्रज्वलितायां अंगारभूतायां घंगुलमा
त्रयच्चात्समिधोर्वाश्यप्यकर्षन्नामध्यदेशात् जुहोतीति। एवमन्येष्वपि सूत्रेष्वस्ति। अ
ग्निर्वर्च इति ब्रह्मवर्चसकामस्य। ब्रह्मवर्चसकामस्य यजमानस्य अग्निर्वर्च इति मंत्रेण हु
त्वा हुतिं जुहोति। तदुहैतदेवारुणये ब्रह्मवर्चसकामायब्रूयान्नूवाचाग्निर्वर्चो ज्योतिरिति अन्ने

अयं मंत्रः आगन्तस्तनीयो विकल्पः। काम्यः सत्कर्मानुष्ठानानुष्ठानवेदाध्ययनादिजनितब्रा॥
ह्मतेजोब्रह्मवर्चसं। कूर्चे निधाय गार्हपत्यमेवेक्षते होष्यन्नस्मिन्। आस्मिन्गार्हपत्ये होष्य
न्होमकारेष्यन् इत्येवाहुतिहोमानंतरं स्रुवं कूर्चे निधाय मुक्त्वा गार्हपत्यमग्निमवेक्षते। हो
तुपस्ताद्यद्र्वीमाहुतिंजुहोत्युपसाद्योत्तरामितिवचनान्निधानं। किमर्थमिति चेत् हविष्याज्ञानघर्ष्ये॥
हविषीमंवामुंचत्वोक्तौ तेन समधामितिप्रतिवचनदर्शनात्र गार्हपत्यावेक्षणं होष्यन्नस्मिन्निति॥
मनेनापरस्मिन्होत्रस्य पारिकुनादृश्यति। नयाचोक्तं। शारवान्तरे आहवनीयएवजुहुया
दिति। सर्वेषु त्वेव जुहुयादिति वचनाद्वा होष्यन्निसुक्तत्वान्मनागिनहोत्रस्याग्निहोत्रवाहनाहुत्वे
स्तत्र वन गार्हपत्यावेक्षणं। नत्र होमामावान्। कस्मीमुत्तरोभूयसी। उत्तरामिति देशनःकाल
नश्च व्याख्येयं। उत्तरां द्वितीयामाहुतिं। उत्तरं पूर्वाहुतिहोमस्थानादुत्तरस्मिन्नग्निप्रदेशे हु॥
र्वाहुतितो भूयसीं बहुतरद्रव्यकां जुहोति। तूष्णीं मंत्रं विनापि जुहोति। मंत्रश्चाविधानो देवाप्रा
सत्तूष्णीमिति स्वाहाकारनिवृत्त्यर्थं। नयाहुरिस्वामिनः। उत्तरेहुतौ त्वेवमेव स्वाहाकारेण होतव
ष्णींजुहोतीतिवचनान्निवृत्तिः॥ शारवान्तरान्तरूर्वाहुत्या असंसृष्टामिति चान नया च शारवायनः
॥ उपसाद्योत्तरामसंसृजंस्तूष्णीं भूयसीं हविष्याद्रति। सवैकनीयद्व पूर्वामाहुतिं जुहोति भूय
द्वोत्तरामितिवचनाद्भूयसीमित्युक्तं अत्र द्वितीयामितिवक्तव्ये उत्तरामिति यदुक्तं नद्दत्वा
अग्नेरुत्तरप्रदेशे होमविधानार्थमपि। अथ यो नरास्विष्टतृद्धाजनमेव स्ताच्च स्माच्चा

श्री०
७५
75

मुत्तराहूँ जुहोत्येषा हि दिक् स्विष्टकृत इति। स्विष्टकृद्व्रजनतो नैरेवासंस्रवत्वमपि शांखायनीयं
सूचितं। अत्र प्रजापतिर्देवता। यदग्नये प्रजापतये च स्वाहा जुहोति। यज्ञसूत्रीय च प्रजापतये च प्रा
तरिति शांखायनेन। तथा चाश्वलायनः॥ प्रजापतिं मनसा ध्यायन्तूष्णीं होमेषु सर्वत्रेति सा
पात्यर्वा हुतिः सान्नायमभिहूयते तां मंत्रेण जुहोतीति। अथ यथोक्तरा सा प्रजामिहूयते तां तूष्णीं भि
जुहोतीति च स्मरणात् तूष्णीमिति सूक्तं। भूयिष्ठं स्रुचि। दर्वीहुत्यामल्पहोतव्यं। द्वितीयाहु
सांत द्वेष्या बहुलतरं ततो भूयिष्ठं अतिशयेन बहुलं स्रुचि मस्यां परिशिनष्टि। भूयश
बहुलं स्रुचि परिशिनष्टीति वचनात्। द्विः प्रकंप्य निदधाति। स्रुचं द्विः प्रकंप्य कूर्चे निदधाति
। स्थापयति। प्रकंपनमात्रोर्ध्वं गतीमताग्निहोत्रे न दृश्यते इति प्रतिषेधमतं। तथा वसिष्ठ
नेशं द्विरूर्ध्वा स्रुचमुद्यच्छतीति। तथा च शांखायनः॥ द्विरुदीचीं स्रुचमुद्यम्योपसादयतीति
। उपमृज्य स्रुचं कूर्चे निमार्ष्टि नमो देवेभ्यः॥ स्रुक्काष्ठानिकां हस्तेनोपमृज्य नमो देवेभ्य इ
ति मंत्रेण तं द्रव्यालिप्तं हस्तं कूर्चे निमार्ष्टि निमार्जनेन तद्द्रव्यालिप्तं द्रव्यं कूर्चे नयोजयतीत्यर्थः स
स वै हि स्रुनो जुहोति द्विरुपमार्ष्टीति। तथा। किं स्विस्रुवं परिमृज्य कूर्चेन्यमार्ज तिरश्चीन तथाप स्रु
वं परिमृज्य कूर्चेन्यमार्जयेदिति च स्मृतेः स्वधा पितृभ्य इति दक्षिणत उत्तानं। पाणिं निदधा
तीति शेषः। उत्तानेनैव हस्तेन पुनः स्रुगग्रमुपमृज्य हस्तस्याधोभागमेव द्रव्यालिप्तं कृत्वा पितृ
भ्य इति मंत्रेण कूर्चस्य दक्षिणतो भूमावेवोत्तानं पाणिं निदधाति। किं द्वितीयं परिमृज्य दक्षि

राम
७५

णानोहस्तमुपासीवदः। दक्षिणेन कूर्चाद्दक्षिणभागेभूमौ हस्तमुपासीवदः॥ उपस्थादित्नसी
सर्थः॥ यद्दिजीयं परिसमूह्य दक्षिणेनोहस्तमुपासीवहेपि न्द्वं स्वेनाप्रेवमिति चक्रनेः॥ तथा च॥
शांखायनः सर्वमुपमार्जनं कुशेषु निलिंपत्योवधीः प्राणमीति उत्तरं दक्षिणतः पाणिमुत्ता
नं निदधाति पितॄन्प्रीणामीति मनसा। यद्दिहूतीयं दक्षिणेन कूर्चमुत्तानं पाणिं निदधाति
पितॄन्तनप्रीणातीति तेषांवा स्थानं एवमेव सर्वेषु शाखांतरसूत्रेषु स्ति। तथा चमानवे। उ
दृंदंडांस्कं चं निदधात्योषधीर्जिन्वेति दर्भेषु लेपं निमार्ष्टि पितरम्पः स्वधेति दक्षिण उत्तानं पा
णिं निदधातीति। काठके। स्कं चाग्नं परिसमूह्य स्पर्शादि समानं। तथा वंपस्तंबः॥ प्राचीनावीती स्व
धा पितृभ्यः पितॄंजिन्वेति दक्षिणेन वेदिं भूम्यां लेपं निमृज्येति। तथा चाश्वलायनः॥ अव
मृज्य कुशमूलेषु निमार्ष्टि पशुम्यस्त्वेति तेषां दक्षिणत उत्तानाः अंगुलीः करोति प्राचीनावी॥
ति नमोस्मी स्वधा पितृभ्य इति चेति। उपमार्जनमपि सांस्य मुखात्प्रत्यक्पाणाः प्राक्संस्थं। तथा
वापस्तंबः। मुखाद्दर्वाचीनं सायं लेपमवमार्ष्टि पुष्टिमानरिति। अपदुपस्थयोनरयोन्नपुष्टिका
मः। दक्षिणत उत्तान पाणि निधनानंतस्यपामुपस्थश्येनं कार्यं तत्रापि अयं मंत्र मुक्तेति सा
स्म मपि पुनरुक्तमेते। अपसव्यं दक्षिणामुखस्तादि धर्मनिरासार्थं तत्र दूनरयोर्गार्हपत्य दक्षि
णाग्न्योः पुष्टिकामोजुहोति। चकाराद पुष्टिकाम्यपीति। तत्र गार्हपत्ये होममाह। स्वधात्स्या॥
स्कं वेणोहपुष्टिमिति गार्हपत्ये। स्वधात्स्याः सकाशात्। स्कं वेण यथा योगं गृहीत्वेह पुष्टिमिति मंत्रेण

श्री०
१६

गार्हपत्यस्यारोग्योः स्रुवेणैव जुहोति। तिष्ठन् समिधः सर्वत्र मध्यम इति ध्रुवं तिष्ठता मार्गेण मध्या
प्रदेशे समिदाधानं कर्तव्यं। ततस्त्याः पार्श्व आहुतिर्होमः॥ अग्नेरेषा हुतीरुपविश्येति वच
नात्। अंतरांत समिद्धोमवर्ज्यं। बाह्या आहुमयहृति स्रुक तो स्त्र। विना तत्र त्रे। गार्हपत्ये समिध
माधाय स्थाल्याः स्रुवेण जुहोति इहपुष्टिमिति आश्वलायनः॥ तूष्णीं समिधमाधाया
ग्नये गृहपतये स्वाहेति गार्हपत्ये नित्यो न्तरांत तूष्णीं समिधमाधायाग्नये स्वाहां। वशपतये स्वाहेत्या
शिं तूष्णीं द्वितीयां द्वितीयामाहुतिं तूष्णीं स्थाल्याः सकाशात् स्रुवेणैव जुहोति। तूष्णीमि
त्युक्त्वात्। अत्रापि स्वाहाकाराभावः॥ अग्नये न्नादायान्नपतये स्वाहेति दक्षिणाग्नौ तू
ष्णीं द्वितीयां। गार्हपत्ये होमानंतरं दक्षिणाग्नौ समिधमाधायाग्नये न्नादायेति मंत्रेण स्थाल्याः
स्थाल्याः स्रुवेण पयो गृहीत्वा प्रथमामाहुतिं जुहोति। ततस्तूष्णीं द्वितीयामाहुतिं जुहोति। तूष्णी
मित्युक्त्वा स्वाहाकारस्याभावः। तेन प्रजापतिं मनसा ध्यात्वैव होमः॥ अनामिकयाद्विः प्राश्ना
ति। अनामिकया स्रुक्तस्थहुतशेषं द्विः द्विर्वारं प्राश्नाति। एकवारं गृहीत्वा प्राश्याचम्य पुनर
प्येवं करोतीत्यर्थः। उत्सृप्याचम्योशिंवति देवांजिन्वपिन्वजिरनीयामुद् रुन्ति सप्त कृ
बीजि न्वेति। द्विः प्राशनानंतरं तत् स्रुक्स्थं हुतशेषमुत्सृप्य पात्रांतरे नीत्वा हस्तेन वा तत्ता आचम्य न
रूपित्वा ततस्तस्मात् हस्तं वा निर्लेढि। जिह्वया सम्यक् दास्वादयति। स वैद्विरग्नौ जुहोति द्विरूपमार्ष्टि
द्विः प्राश्नातीति वचनात्। तथा अथैन दग्नौ हुत्वोत्सृप्याचामतीति लेढि तदस्य पाकयज्ञस्येवे। राम
१६

निष्क्रमेः। उत्तरपूर्वां वाऽहिर्निर्गत्य सेनिमाधर्वीं तद्दृश्यमानमर्घ्यो हुत्वेत्युक्त्वा। अववत्वा स्वात्रां नरे भूत्वा वा
।किं सर्वेषां शीः। किं द्वितीयं किं मुख्यं पात्रमिति। उत्तरपूर्वे दिशि। मीयां तु उत्तरपश्चिमां गत्वा किं आपः पा
नं कृत्वा वा नसीस्वधेः। तद्ध्याय सर्वं प्राशितं मानं नानामेषयं यद्द्वितीयं प्रजानेनापयदुत्तरपश्चा
पांयपदस्तेनामेषमभिनिष्क्रमेत्। ततः प्राश्नानं तरस्मभिन्होत्रहवरणां स्रुक्चमुदके न स्वरायित्वा
श्रिंवतिस्रुचैवोर्ध्वं सिंचति देवांजिन्वेति मंत्रेण। उत्तरतउपचारो यज्ञ इत्युक्तत्वात् उत्तरतः। ततो
द्वितीयवारं नाममग्निहोत्रहवणीं स्वरयित्वापि भ्यत्वा द्विहिरण्णतउत्तिंचति प्राचीनावीती दक्षि
णाभिमुखः। पितॄन् जिन्वेति मंत्रेण। ततो यज्ञोपवीती सपः स्पृष्ट्वा तृतीयवारमग्निहोत्रहवमुद
कं भृत्वा नात्र तृतीयास्रुचमिशान्याम् उदुत्सृजति। तद्भो मुख्यमुत्पोदकमूर्ध्वमुत्सृजति। किं स्रुक्
-अप-आग्नीयप्रतिरोहः। किं द्वितीयं किं तृतीयमेतां दिशमुद्दैस्थाद्रिति। एतां दिशं ऐशानीं। कु
तः। यस्मुसप-आग्नीयप्रतिरोहः। षट्। सर्पदेवजनां स्तेनामेषयं द्वितीयं गंधर्वाप्सरसुस्तेनाप्य
तृतीयमेतां दिशमुद्दैहि षट्। स्वर्गस्य लोकस्यानेन द्वारं प्रवाहिषमिति वचनात्। स्वर्गलोक
द्वारं च ऐशान्यामेव। यत उक्तं मा। निष्क्रान्ति विधायाह यद्वैवोदङ् प्राङ् निष्क्रान्तेनस्या
हदिशि स्वर्गस्य लोकस्य द्वारमिति। एतस्यामागुच्छ्यां ऐशान्यामित्यर्थः। सोऽग्निरौ दूषमुदैहि
षमिस्तुपसर्गविशेषात्सर्वमं द्वितीयं च निरूकरणं। तृतीयम् ऊर्ध्वमुत्करणमिति विशेषः। तृतीया
मिति वचनाद्वेदन प्रथमाद्वितीययोरुत्करणं वतुर्थीकूर्चे स्थाने निनयंचत्सम्यन्ये पृथिवी

द्विने स्वाहा पृथिव्या अम नजुहोमि स्वाहा॥ म नेंम नं म नजुहोमि स्वाहेति प्रत्युर्च्यं स्रुक्वं स्वर
श्री० यित्वा कूर्चं स्थापनस्थाने आहवनीयस्य पश्चात्मा कसंस्थ मुदक्कसंस्थं वा त्रिरितित्रि वा
रिमयोनिषिंचति। पृथिव्या इति हूनीयां। अमनरूतिनूनीयां। शारवांनेरे अमस्रालितयैव
११ स्रुक चोउस्रणत्रय चतुत्वाननः स्रुक वंदर्भैः प्रक्षाल्याग्नये रुस्रादितिनय नंविहितमस्ति॥ कंनय
नेनाहवनीयमयोन्यनेषां रितिय ज्ञघनेनाहवनीयमयोन्यनेषामिति ग्रकेतेः॥ कूर्चस्थान
इस्रुक्। अनम्बा स्योपलक्षणार्थत्वात्कूर्चमनयसायेंमाहवनीयस्य पश्चात्मा कंस
स्थ मुदक्कसंस्थं वा निनयनं कार्यं स्रुक स्रुवमाहवनीयेमनप्यग्निदधाति तस्रुक स्रुवमस
त्वमाहवनीये सहैवमनप्यकूर्चेनिदधाति। अपवानिदधाति स्रुगुग्रदेशे स्थापयति सू
नकार्यत्वात्। तथा चाश्वलायनः मनप्यांनवैदितिनदध्मारिक मत्तेवाप्रयच्छदिति।
आहवनीय इतिशास्त्रानएव आहवनीयगार्हपत्यमुद्रासायं समिध आदधाति स
र्वेषु यथाप्रयुक्तिनः समिद्धिसमिह्वे अग्नेदीदिहि समेद्धाने अग्नेदीदाससमिति। ननो यथा
यथप्रयुक्तितंपर्यस्तिन क्रमेणयेन क्रमेणहोमारंभे यथायु स्रणपूर्वं तेनैव क्रमेण सर्वेष्वग्निषु आ
हवनीयगार्हपत्यसदक्षिणाग्निषुससमिद्धसमिति सामिहूमे अग्नेदीदिहि विसमेद्धाने अग्नेदी॰
दास इति मन्त्राभ्यां द्वाभ्यां समिधा आदधाति। समिधं आदधातीत्येकवच
नात् दृपि सर्वेष्वग्निष्वेक समिदाधानं सिद्धमेव। अतः समिध इति यसूत्रे बहुवचनं तस्मसमि

नित्यस्तरणं नित्यस्तरणस्य समिधामाधानानावधानार्थी मंत्रा अपि त्रय एवैते मन्नीयन्ते। कुतः। वाक्यपा
रिसमाप्तेर्दृश्यमानत्वात्। समिदसीत्यत्र हि दृश्यते वाक्यपरिसमाप्तिः। समिद्धोसि अग्ने दीदिहि
सत्रापि तथा। समिद्धोग्ने अग्ने दीदाय समित्यत्रापि तथैव। अतश्चैकैकेन मंत्रेणैकैकं समि
दाधानं कर्तव्यमिति मन्नीयते। न चावशिष्टं स्वाप्नः। सर्वेषु नु जुहू न्यहाव्याहृतिभिरिति भिस्तिलालित्व
उद्धृत्य स्वास्तित्व न्म चमांसमन्त्रामाहवनीये दिदीत्याश्वलायनः। एवमन्ये च पि सूत्रे चास्ति।
यदा च पर्युक्षणं गार्हपत्ये। ततो दक्षिणाग्नौ। तत आहवनीय इति क्रमेण एवं स्तृतं। तथा समि
दाधानमप्यनेनैव क्रमेण क्रियते। अनन्तरं हि यजमानस्य सायं वा समोपस्थानं। स्थलके उ
पस्थानं वा। ततस्त्रीमाहवनीयस्योपस्थानं तत्समीप आसनं चाततो गार्हपत्यसमीपे
शयनमासनं वा। ततः सर्वेषामग्नीनां पर्युक्षणं प्राग्वत्। ततो वाग्विसर्ग आचमनं वा। ततोग्नी
स्तिनिःक्रमणं कुर्वतो दक्षिणाग्नेर्मनसा ध्यानं। अथ प्रातर्होमे वाग्यमनकालस्यावधि
माह। वाग्यतो दोह प्रभृत्याहोमात् क्षीरहोतारं चेत् क्षीरतो होतोचेदाहार वाग्यतो जुहोतीति दोहनादो
ह प्रभृत्याहोमात् वाग्यतो भवतीति। क्षीरहोतेति योगमनपेक्ष्यैव रूढ्या प्रयुक्तं ते। तेना प्रयुक्ते
के होमप्रयोजनस्य गोदोह प्रभृतिहोमसमाप्तिर्यावत् वाग्यमस्य विकल्पः। अथ वाक्ये यदि क्षीर
होता जुहोति। तदा दोह प्रभृत्याहोमात् वाग्यतो भवतीत्येवं योजना यजमानस्यानुप्रयमनावमनानं
तरं भवाग्यमो वा चं विसृज्य प्रदक्षिणीयमाचामनमिति। अस्मिन्पक्षे क्षीरहोतुर्वाग्यमनं १८ प्रातः

॥ रेखामात्रं च दृश्येत रश्मिभिश्च समन्वितः ॥ उदयं तं विजानीयाद्धोमं कुर्याद्विचक्षणः ॥

र्जुहोत्यनुदिते। प्रातःकाले अनुदिते सूर्येऽग्निहोत्रं जुहोति। अथ यस्मान्नरनुदिते जुहोतीति स्मृ
श्री० तेः॥ अनुदितलक्षणं द्विविधः॥ अनुदितं नक्षत्रसमयाध्युषितं च॥ तथा च मनुः॥ उदितेऽनुदिते चै
१८ व समयाध्युषिते तथेति कात्यायनः॥ रात्रेः षोडशमे भागे ग्रहनक्षत्रभूषिते। कालं त्वनुदितं
ज्ञात्वा होमं कुर्याद्विचक्षणः॥ तथा प्रमाणसमयेन हेन नक्षत्रमंडले रविवर्जिते दृश्ये तत्सम
७८ याध्युषितं वदन्ति। अस्माकं त्रिकायां यत्र यत्र प्रातरित्युच्यते तत्र प्रातर्होममेव मन्वीत। अ
न्यत्सर्वं साधारणं सायंप्रातर्होमयोः॥ ननु सायंहोमसंबंधि सर्वमपि तत्रैव वक्तव्यं। इह तु
प्रातर्होमसंबंधे वक्तव्ये किमिति पुनः साधारणे प्रयोगे कं। कर्मैकत्वात्सायमनायेत्यदोषः
। सायारंभं प्रातरपवर्गमिदमेकं कर्मेति। तथा चोक्तं। सायमादि प्रातरंतमेवं कर्म प्रचक्ष
ते। दर्शान्तं पूर्णमासाद्येकमेव मनीषिण इति अंतरेणापरां। अग्नीगत्वा दक्षिणेन वा प्रद
क्षिणं गार्हपत्यं परीत्योपविशति यजमानः॥ पूर्वेणाहवनीयं प्रदक्षिणमीत्स समन्वादक्षि
णाग्नेरुत्तरेणापराग्नी अंतरेण गार्हपत्यदक्षिणाग्न्योरंतरालेन प्रसङ्गत्वा अथवा गार्ह
पत्यदक्षिणाग्नी दक्षिणेन वा गत्वा गार्हपत्यं प्रदक्षिणं परीत्य स्वस्थाने उपविशति। अयं सं
चरः सायंप्रातर्होमयोः साधारणः॥ प्रातरित्यविशेषितत्वात्। न तत्र मार्गक्रमसंचरेण सह
विकल्पः पूर्वीचय यथादेशं पितृपितृवशह्नादेवमेव प्रविश्य यथादेशमादेशस्थानतिक्रमेणो
पविशति। तत्र गार्हपत्यस्याग्नेय्यां दिशि प्राङ्मुखो भिमुखो वा स्यथ्यैः अथ आचामति दृष्टिरसीति॥

राम
१८

यजमानोऽन्यतरेण संचरेण विहारं प्रविश्य स्वस्थाने उपविश्य इहस्थिरसीति मंत्रेण य आचा
मति। उदकं भक्षयतीत्यर्थः। एतदाचमनं सायंप्रातर्होमे च भवति प्रातरित्यविशेषितत्वात्॥
अग्नेर्विसर्गोपदेशादाचमनानन्तरं यजमानस्य वाग्यमनं। यस्यापि तत्सीमा चामति वाचं
विसृज्य पुनराचामति विधृदसीति इहैव धारणावर्जमितस्य पर्युक्षणानन्तरं यजमानो वा
वं विसृज्य विधृदसीति मंत्रेण पुनराचामति। वाग्यमस्य पदार्थधर्मत्वात् पर्युक्षण
स्यापि पदार्थत्वात् तदन्ते विसर्गः। अत एव विसर्गोपदेशात् पूर्वाचमनानन्तरं वाग्यमनं भवति।
विसर्गस्य ग्रहणपूर्वकत्वात्। सत्येन व्रतमुपैमीति। व्रतशब्देन वाग्द्व्यमत उच्यते। अतो मंत्रलिं
गादप्येवं ज्ञायते। यदाचमनानन्तरं वाग्यमनमिति उन्नयामीत्याह प्रातः प्रातरग्निहोत्रे उन्ने॥
ष्यामीत्यस्य स्थाने यजमानं प्रत्युन्नयामीत्याह एष तिष्ठीरहोता प्राक्तः स्थः समित्पर्युक्ष
णधारणा च। प्रातरित्यनुवर्तते। प्रातर्होमे समिदसीत्येन ज्ञमिदाधानात् होमात् पूर्वं मा विपर्यस्ता
द्वा विपर्युक्षणं च प्राक्संस्थं भवति। प्रथमं गार्हपत्यस्य पर्युक्षणं ततो दक्षिणाग्नेः ततः प्राक्सं
स्थाधारणं ततः आहवनीयपर्युक्षणमिति। एवं प्राच्यः संस्था भवति। ततो दकधारापि प्राक्सं
स्थो धारा ... आहवनीयो गार्हपत्यादाहवनीयं यावत्त्रिनेया उभयत्र वा। अथ सायंहोमयत्रसा
यंहोमे प्रातर्होमे च समित्पर्युक्षणधारास्वेतेन सर्वं प्राक्संस्थमेव भवति। वा विकल्पार्थः अ
ग्निशेषत्वर्थः। सायंहोममंत्रेषु यत्र य आग्निशब्दः प्रातर्होममंत्रेषु तत्स्थाने तत्र तत्र सूर्यश
ब्द

श्री०
७६

हूः प्रयोज्यः॥ अनेन सर्वेण मंत्रसमाम्नायः प्रकटीक्रियते। अग्निहोत्रमंत्रप्रकरणे ये सूर्यलिंगा
का मंत्रास्ते प्रातर्होमे प्रयोक्तव्या इति। तेन गार्हपत्यदक्षिणाग्निहोमे निपठितस्य स्थाने सूर्यपदप्रयोगो
न भवति। समाम्नायाभावात्। अग्निर्ज्योतिरिति मंत्रे सूर्यो ज्योतिरित्येवेति अग्निर्ज्योतिरित्यस्य स्था
ने सूर्यो ज्योतिरिति। अग्निर्वर्च इत्यस्य स्थाने सूर्यो वर्च इति। रात्र्योषसा द्वितीया वा सजूरात्र्येंद्रवत्ये
स त्वरात्र्येंत्यस्य स्थाने सजूरुषसेंद्रवत्येति सजूरिंद्रवत्येति वा प्रातर्होमे प्रयोज्यं। अथ प्रातः
सजूर्देवेनेति प्रैतृत्वस्य सजूरुषसेंद्रवत्या सद्रूवेति व्यक्तत्वात् ज्योतिः सूर्य इति वा प्रातः॥ अथ
वा प्रातर्होमे ज्योतिः सूर्य इत्यनेन मंत्रेण वा आहवनीये पूर्वामाहुतिं जुहोति। अथ वा प्रातर्ज्योति
ः सूर्यः सूर्यो ज्योतिः स्वाहेतीति श्रवणात्। एतत्त्वसायपक्षे अग्निर्ज्योतिरित्यनेन पूर्वामाहुतिं हुत्वा
न हि प्रातर्होमे आहवनीये पूर्वाहुतिहोमे मंत्रविकल्पः। सूर्यो ज्योतिरिति वा। ज्योतिः सूर्य इ
ति वेति व्यक्तत्वादेवमेवाभिहितत्वात्। अथ काम्याग्निहोमकालानाह प्रथमास्तमितेऽपर्युदयं च
स्वर्गकामस्य जुहुयादिति जुहोति पर्युदयं सूर्योदयसमीप एव प्रातर्जुहोति कालादेशे च तत्फलं न स्वाग्नि
होत्रात्। प्रथमास्तमिते नमोऽभ्युदये सायं जुहुयादित्युदये प्रातः आयुःकामस्य आयुःकामस्य य
जमानस्य नमोऽभ्युदये तमसोऽन्धकारस्यागमे सायं जुहुयात् विधयति विगच्छति मासि मासि प्रातर्जुहुयात् अ
न्तः पशौ पशुकामस्य सायं प्रातः पशुकामस्य यजमानस्य अन्तः पशौ काले सायं प्रातश्च जुहुया
त्। अन्तर्गतमध्ये पशवो यस्मिन्काले आसन्नन्तः पशुकामः तस्मिन्नन्तःपशौ एतेन सायंकाले

यशुषु गताममध्ये समागतेषु। प्रातर्गतागतामाहुहिरनिस्तेषु शयने श्रीकामस्य प्रातः श्री कामस्यय
जमानस्य शयानेसु एवं समस्तलोके अप्रबुद्धे एवं प्रातर्जुहुयात् एवं काम्यान्होमकालानुक्त्वा
धुना काम्या अग्न्यवस्था आह प्रथमसमिद्धे धूप्यमाने प्रजासु निहस्येव सहस्रान्नमश्नन्तः। यो
यजमानः प्रजासु स्वदेशनिवासिषु लोकेषु निहन्यादेव नितरां प्रजाः हत्वा इव अन्यथा नाशयित्वा
इव नाम्यः सकाशात् सहसा बलेनान्नमत्तुमिच्छति धनधान्यादि ग्रहीतुमिच्छति। तस्यैवंविधस्य
यजमानस्य प्रथमसमिद्धे प्रथममेव ज्वालाप्रादुर्भावे धूप्यमाने समिद्धेऽग्नौ जुहोति। न ध्वैतन्नप्रथ
म॰' समिद्धो भवति। धूप्यत इव नार्हिर्हि हविर्भवतीति प्रसरस्तैतस्य भूपतेः तत्त्वेन क्षत्रियविषयं
। ब्राह्मणवैश्ययोर्जनपदस्य सम्भवात् भूयिष्ठाध्वर्षिगृहीत्वेव सहसा योयजाम्गृहीत्वा इव उपभू
ष्य इव लोककण्टकादिना बध्या इव ननु निह समसहसा बलेन नोभ्यः प्रजाभ्यो न्नमत्तु धनधान्या
दि स्विकर्तुमिच्छति। तस्य यजमानस्य भूयिष्ठा विविबहुलज्वालायुक्तवह्नौ जुहोति। अथ
यत्रैतन्नप्रदीप्तरोमवतीत्यादि भक्तेः एतदपि क्षत्रियविषयमेवाब्वला ज्ञारणप्रजाभ्यो वि
ना दानेन तस्यैवाधिकारात्। प्रदीप्तनमे श्रीयशस्कामस्य। श्रीकामस्य यशस्कामस्य च यजमान
स्य प्रदीप्तनमे अग्नि शयेन प्रदीप्तेऽग्नौ जुहोति अथ यत्रैतन्नप्रदीप्तो भवतीत्यादि भक्तेः एतत्ब्रा
ह्मणानां त्रयाणां वर्णानां साधारणं आर्चिः प्रसवायेमन्त्रेणान्नमत्सनः मित्रस्य मैत्री वो मैत्राणो
यजमानो मित्रभावेन प्रजाभ्यो न्नमत्तुमिच्छति तस्यार्चिःप्रसवायेज्वालायसरणे जायमाने जुहोति

श्री॰ ।अथ यत्रैतन्मतिनिनराभिसेत्स्यादिष्कनेः। एतद्दपि त्रैवर्णिकस्य सद्ध्मरणं अंगारेषु वाक
श्यमानेषु ब्रह्मवर्चसकामस्य। ब्राह्मं तेजो ब्रह्मवर्चसं। न कामस्य यजमानस्य वाकश्यमानेषु दे
८० दीप्यमानेष्वंगारेषु जुहोति। अथ यत्रैतद्दंगाराण्वा काश्यन इवेत्स्यादिव चनात्। एतच्च ब्राह्मणस्यैवाब्र
ह्मवर्चसस्य तस्यैवो चितत्वात्। एवं काम्य अग्न्यवस्था उक्ता। अथ तु ना काम्यानि होम द्रव्या
80 ण्याह। यथ यसा स्वर्गकामः पशुकामो स्वर्गकामः पशुकामो वा यजमानः पयसा दुग्धेनाग्नि॥
होत्रं जुहुयात्। यवाग्वा ग्रामकामः। ग्रामकामो यवाग्वा जुहुयात् तंडुलैः शिथिलपक्वा यवा
गूरित्युच्यते पेयाय वाग्‌रिति धूर्तस्वामी तंडुलैर्बलकामः। बलकामो यजमानो व्रीहियव
श्यामादिहविष्यान्नतंडुलैर्जुहोति। तदुःक्तं स्मृतौ। व्रीहिः श्यामाकनीवारयवगोधूम शा
लयः एतेषां तंडुलाहोम्या यावनालामि यं गवइति दध्नेन्द्रियकामः इंद्रियं बलं श्रोत्रादि
। तत्कामो यजमानो दध्नाग्निहोत्रं जुहुयात्। अनधिश्रयणं तक्कनिसामर्थ्यात्। दध्नो
धिश्रयणं न भवति। नदध्यधिश्रयणमिति सूत्रेः सामर्थ्यात्। यदि दध्नः धिश्रयणं क्रियते नर्हि
तायसंयोगात् दधित्वमेवागच्छति। आमिक्षान्वसपघते। तक्रसुपादाने तु नोपिपयसामर्थ्यमुपसु
पादीयते तदन्यस्यापि तंडुलादेरनधिश्रयणं यथा स्यादिति। दध्यधिश्रयण प्रतिषेधश्चात्लिंगं
तस्यानुवादत्वात्। तथा नाहापस्तंबः। न दध्यधिश्रयणं न प्रतिषिंचतीति। एवं तंडुलानोदनं सो
मं वाज्येन तंडुलैरोदनेन सोमेन वा जुहुयादिति घृतेन तेजस्कामः। तेजस्कामो यजमानो घृतेना॥

ग्निहोत्रं जुहुयादिति ॥ स्म संतनोर्दशद्रव्याणि निसान्नुक्तानि ॥ तैलं दधि पयः सोमो यवागूरोदनं
तण्डुला मांसमापश्च दशद्रव्यास्य कामनस्तानि संवत्सरं जुहुयादेतेषामेकैकेन कामसंयोगे प्रथमा
लमिनयपुंदपवस्वर्गकामस्येत्यादिसूत्रोक्तानां कालानामन्यवस्था द्रव्याणां मध्ये कामसंयो
गेनिमित्तसमीपं ॥ कामसंबन्धनिमित्तस्वर्गादिकामस्ति अर्थ्य एकैकेन संवत्सरपर्यन्तं जुहु
यात् ॥ संवत्सरेणैकस्य कामस्य सिद्धिर्भवतीत्यर्थः सायंप्रातर्वा ॥ अथवा कामसंयोगे सति
एकैकेन कालादिना सायंप्रातर्होमः कर्त्तव्यो न संवत्सरं तत्रापारंभ प्रातरथ वर्गद्दमेक
मग्निहोत्रमनयोस्त्रयं गुणफलसंबन्धः ॥ तस्मात्सायंप्रातरेवेति नत्राप्यन्यवस्था एकै
केकेन कामेन संवत्सरमेहोतव्याण्येतेषामेकं संवत्सरमुपेत्येदिति न त्वत्रान्यविशेष
स्क्रमेः ॥ अकाम्यहोमहोमद्रव्यपक्षेपि सायंहोमे येन द्रव्येण हुतं तेनैव प्रातर्होमः कार्यः ॥ न या
वयत्तपार्श्वो सायंहोमे बुपद्रव्यं प्रातर्होमे पुत्तद्रुवेतो मिन्नद्रव्यं हुतमयपतु अहुतं तेस्यन द्रव्येन ॥ हुति
॥ तेन सायंहोमद्रव्यादन्येन द्रव्येण प्रातर्होमे क्रोते ऽनादिष्टहुत्वा सायंहोमद्रव्येण पुनः प्रातर्होमः
कार्यः ॥ अथ यदि वा सायंहोमहोमे संगृहीतं द्रव्यं प्रातर्होमे यदा न लभ्यते न दान्नमग्निनिद्धिम्नं तं स
दृशं द्रव्यान्तरं ग्राह्यं न तु यावेकस्यि कद्रव्यान्तरं तस्मिन्नम्नरूनद्रव्या दयवा भावात् ॥ सदृशप्रतिनिधिप्र
त्नद्रव्यावयवसंमवाचूर्णादि हिरणेन प्रवेशमग्निहोत्रेष्टिषु अग्निहोत्रे सायंप्रातर्होम इष्टिषु वस
तीसु दक्षिणेन हरेण गार्हपत्यागारे कर्मार्थप्रवेशनं कर्त्तव्यं सायंप्रातरा आहवनीयस्य सन्नोपः ॥

श्रौ० ८१ स्थाने। सायंहोमे प्रातर्होमे च आहवनीयस्योपस्थानं। सीकर्त्तव्यं न समीप एवोपवेशनं चाति
ष्ठन्नामुपस्थानं यदेव सायंप्रातराहवनीयमुपतिष्ठते तदुपचारात्तेन देवनस्योपस्थानमिति वच
नात्। अत एव दूर्वमुपस्थानं जानन्नातत। आसनं कार्यं। सूत्रे त्वस्या वरन्वा दासनेयदृस्य॥
पूर्वनिपातः। शय्यासनं वा गार्हपत्यस्य एवमाहवनीयमुपस्थाय गार्हपत्यं प्रत्यागत्य तत्समीपे
४ शय्याशयनं कर्तव्यं। आसन्नमुपवेशनं वा कर्तव्यं। अथ यदेव प्रतिपरेत्य गार्हपत्यमासे
वा शेते वा तद्देवननस्योपस्थानमिति वचनात्। एतदाहवनीयस्योपस्थानं गार्हपत्योप
स्थानं च। पर्युक्षणात्तु देवं सवितारं नेहि पर्युक्षणमुक्तं। हृदने ध्वाराववर्जमिति। वा समीपोपस्था
नं च तेषं अत्रस्मादपि दूर्वं नरमं वनीति प्रागुक्तं। संव्रजन्मनसोपस्मन्यदाक्षिणाग्निं आ॥
आपं क्रमः। आहवनीयगार्हपत्योपस्थानासनानन्तरं पर्युक्षणं। ततो वाग्विसर्गः। विध॥
क्षदक्षीत्या वमनं न्वातनः प्रागुक्तसवरदूयमर्ध्येनसंवरेण दोषं प्रविष्टेऽभवति अतीन्ध
निष्क्रम्य अभ्यवक्रमणमिति वचनात्तेनैव संचरेण संव्रजन्निष्क्रामेद्दक्षिणाग्निं मन
सोपस्मरन् मनसैव ध्यात्वोपतिष्ठेत। अथ यत्रैव संव्रजन्नन्वाहार्यपचनमुपस्मरेत् देवं
मनसोपतिष्ठते तदेवनस्योपस्थानमिति वचनात्। अनशित्वा प्रातर्मुहूर्त्तं ससनासन॰स
म्युपस्था प्रातः कालेयजमानः अनशित्वा अनशनभोजनमकृत्वा नतः। प्राग्जे वमुहूर्त्तंस प्रगि २
भ्यस्य सभायामासनं उपवेशनं करोति। अथ प्रातरनशित्वा मुहूर्त्तं सभायामासित्वा

राम ८१

पि कामं प्रवत्स्यन्नपि जातदेवस्योपस्थानमिति निरुक्तेः भस्मोद्धरणमुपेक्षितं नानन्तः सम्यक्समीपे उपवेशनानं
तरं उद्धृतं भस्म उपेक्ष्य ततः उपगच्छेत् । गार्हपत्यादिभ्यो भस्मोद्धरणयत्नराशिः छन्नो भवतीति तत्समीपगच्छेदिति
सर्वत्र ॥ अथवा यत्रैव भस्मोद्धरणमुपनिगच्छेत् तत्र देवतस्योपस्थानमिति वचनात् । अत्रोपस्थानं चोपस्थे
यस्य मनसा वा वाक्कर्मणा वा एधनं । तत्रतत्रोपस्थानस्योपक्रमे ब्राह्मणे आहवनीयादीनां यदि
दृष्टिरूपत्वमुक्तं । तद्रूपस्य स्वेदं दृश्यादिना । तदत्रोपस्थानकाले एषामिंद्राग्निदिरूपत्वेन चिंतनार्थी
दक्षिणाग्नेर्मनसोपस्थानविधानादितरेषां वाचापि दृष्ट्याहवनीयायनमस्येव मारोधनं कार्य
मिति मन्तव्यं । ततः अग्ने दृष्ट्याहवनीयायनमस्ते स्वाहाहवनीयनमस्कुर्यात् । एवमायुः संज्ञे गार्हपत्यायन
म इति गार्हपत्यं तदाय्यानेषिधायान्वाहार्यपचनाय नम इति दक्षिणाग्निं मनसैव नतु वाचा अनु
मंत्रेणान्वाहार्यपचनाय नम इति सन्ध्यां अग्नये यासवायमस्मोद्धृत्याय नम इति भस्मराशिं नमस्कुर्या
दिति एतत्र्यतन्त्र्यतदुपस्थानं कालस्वस्वयंवा जुहुयात् सर्वदा स्वयमेव वाग्निहोत्रं जुहुयात् । अन्यो
वा जुहुयादिति विकल्पः ॥ तदुक्तं स्मृतौ । संध्याकर्मावसाने तु स्वयं होमो विधीयते । स्वयं होमे फलं
ते यस्मात्तदन्येन जायते किं तत्र अन्येन होमे कृते फलमित्यपेक्षिते सर्वत्राह । होमे यत्फलमुद्दिष्टं जुहु
तः स्वयमेव तु । हूयमाने तदन्येन फलमर्द्धं प्रपद्यत इति । तथा षड्विंशब्राह्मणे । अन्यैः शतहुतान्होमा
मानेकः शिष्यहुतो वरः । शिष्यैः शतहुतान्होमामानेकः पुत्रहुतो वरः । पुत्रैः शतहुतान्होमानेकोऽस्मात्स
हुतो वरमिति । तथा । ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एतैरेव हुतं यस्मात्तद्धुतं स्व

श्रो० यमेव वा ॥ इति विद्यानिर्जामाता । अन्य आसिद्धं भागिनेयः सुतापतिरिति वा पाठः तथा न वै कन्या न
युवतिनास्य विद्यो न बालिशः ॥ होतास्याग्निहोत्रस्य नान्नो नासंस्कृतः तथा नरकं हि पतन्ति ते जु
८२ ह्वतः सह यस्य तत् । तस्माद्वैतानकुशलो होता स्याद्वेदपारगः इति । यासु तास्याग्निहोत्राशितयांति हू
परमां गतिं । अत्र स्वर्गकामो यजमानोऽयं यागं तु मिष्टा तनुप्रोषिते प्य यवाशक्ते स्वामिन्यधिका
रिणि । पुत्रो भ्राता न या पत्नी शिष्यो वा जुहुयादिति । सूत्रस्यार्थसारे । यजमानः प्रदेशस्थाश्च पत्नीपु
त्रश्च कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेवं हुतं यत्तु तद्धुतं स्वयमे
व तु । पत्नी कन्या वा जुहुयाद्धिता पर्युक्षणं क्रियामिति । उपवसथे नियम उपवसथे नियमः ॥ उ
पवसथस्य शेषे न पौर्णमास्यमावास्ययोः उपवसथे । स उपवसथ इति श्रुतेः तत्र स्वयमेव जुहुयादिति स
निय यमः ॥ स्वयं होत्रेणैते रात्री अग्निहोत्रं जुहुयादिति । तथा एते वै सत्री [illegible] स्वयं स्वयोर्हैवं ॥
विद्वान्स्वयमुपवसथे जुहोति सर्वं हास्य हैवास्य तत्स्वयं हुतं भवतीति श्रुतेः ॥ अन्नत्राहस्सूनके मन
केपि न कालमेव ज्ञात्वा स्वयमेव होमः कार्यः ॥ नियमस्सामर्थ्यानर्थौ नैकमरिणि न कालस्नान
शुद्धिमवाप्नुयादिति वचनाच्च । सूत्रस्य नहि रम्यासो ध्यायत्पूरि समाप्तिस्सूचनार्थः इति श्री ॥
श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतमहायाज्ञिकश्रीदेवज्ञेनेका
त्यायनसूत्रव्याख्याने चतुर्थोऽध्यायः समाप्तः ॥ श्री सम्वत् १९ २१ राम राम राम राम राम राम

राम
८२

दे॰भाव यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धम् अशुद्धं वा मम दोषो न दीयते १ संव
८३ त् १८८१ मासानां मासोत्तमे मासे कार्तिक मासे शुक्ल पक्षे अष्टम्यां ८ सोमवासरे शुभं॥

83

राम
८३